VSa 294.5
Ris
50491

THE LIBRARY

S. N. D. T.
WOMEN'S UNIVERSITY
BOMBAY.

S. N. D. T. WOMEN'S UNIVERSITY
LIBRARY

25 APR 1977

सार्थ ऋषिपंचमी

पूजाकथा.

S.N.D.T. WOMEN'S UNIVERSITY LIBRARY
25 APR 1972
50491

भगवान


ब्राह्मण.
स्त्रिया.

श्रीगणेशायनमः ॥ अथभाद्रपदशुद्धपंचम्यांऋषिपंचमीव्रतम् तच्च मध्यान्हव्यापि न्याकार्यम् तथामाधवीयेहारीतः पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनीतिथिः दिनद्वये तद्व्याप्तौवापूर्वद्विधायांकार्यम् इति मदनरत्नांत्प्राप्तेभाद्रपदेमासिशुक्लपक्षस्यपंचमी ॥ तस्यांमध्यान्हसमयेनद्यादौविमलेजले ॥ कृत्वापामार्गसमिधअष्टोत्तरशताधिकः ॥ अथवाकारयेत्सप्तदंतधावनमादितः ॥ वनस्पतिप्रार्थना ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञाचमेधांचत्वन्नोदेहिवनस्पते ॥ संप्रार्थ्यानेनमंत्रेणकुर्याद्दंतधावनम् ॥ तत्रमंत्रः ॥ मुगदुर्गंधिनाशायदंतानांचविशुद्धये ॥ ष्ठीवनायचगात्राणांकुर्वेहंदंतधावनम् ॥ अनेनदंतान्संशोध्यस्नायान्मृत्स्नानपूर्वकम् ॥ अथचकेशवादिनाममंत्रेणस्त्रीणांपंचगव्यंवाकुर्यात् ॥ अथसंकल्पः ॥ केशवादिचतुर्विंशतिना० श्रीमन्महागणाधिपतयेनमः ॥ श्रीअरुंधतीसहितकश्यपादिसप्तर्षिदेवताभ्योनमः ॥ अविघ्नमस्तु ॥ सुमुखश्चैकदंतश्चेत्यादिपुराणोक्तफलप्राप्त्यर्थं ॥ ममइहजन्मनिजन्मांतरेचभर्त्रासहअखंडितसौभाग्यादिपुत्रपौत्राद्यभिवृध्यर्थं रजोदोषकृतभां

डादिसंपर्कजनितपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं अरुंधतीसहितकश्यपादिसप्तऋषिप्रीत्यर्थंयथामीलितोपचारैः सप्तऋषिपूजनमहंकरिष्ये ॥ अथपूजा विधिः ॥ आदौनिर्विघ्नतार्थंगणपतिपूजनंकलशपूजनंचकरिष्ये इतिसंकल्प्य ॥ गणपतिपूजनस्मरणंवाकृत्वा ॥ कलशस्यमुखेविष्णुःकंठेरुद्र० ॥ इतिकलशपूजनम् ॥ अपवित्रःपवित्रोवाइतिमंत्रेणपूजाद्रव्याणिप्रोक्ष्यआत्मानंप्रोक्षयेत् ॥ अथआवाहनम् ॥ कश्यपः सर्वलोकेशःसर्वदेवेषुपूजितः ॥ नराणांपापनाशायऋषिरूपेणतिष्ठति ॥ कश्यपायनमः ॥ कश्यपंआवाहयामि ॥ १ ॥ अत्रयेचनमस्तुभ्यंसर्वभूतहितैषिणे ॥ तपोरूपायसत्यायब्रह्मणेमिततेजसे ॥ अत्रयेनमः ॥ अत्रिंआवाहयामि ॥ २ ॥ भरद्वाजनमस्तुभ्यंसदाध्यानपरायण ॥ महाजटिलधर्मात्मापापंहरतुमेसदा ॥ भरद्वाजायनमः॥ भरद्वाजंआवाहयामि ॥ ३ ॥ विश्वामित्रनमस्तुभ्यंबालमुखमहाव्रतम् ॥ अध्यक्षीकृतगायत्रीतपोरूपेणसंस्थितः ॥ विश्वामित्रायनमः ॥विश्वामित्रंआवाहयामि ॥४॥ गौतमःसर्वभूतानांऋषीणांचमहाप्रियः ॥ श्रौतानांकर्मणांचैवसंप्रदायप्रवर्तकः ॥

गौतमायनमः ॥ गौतमंआवाहयामि ॥ ५ ॥ जमदग्निर्महातेजास्तपसाज्वलित
प्रभः ॥ लोकेषुसर्वसिध्यर्थंसर्वपापनिवर्तकः ॥ जमदग्नयेनमः ॥ जमदग्निंआवाहया
मि ॥ ६ ॥ नमस्तुभ्यंवसिष्ठायनलोकानांवरदायच ॥ सर्वपापप्रणाशायसूर्यान्वय
हितैषिणे ॥ वसिष्ठायनमः ॥ वसिष्ठंआवाहयामि ॥ ७ ॥ अरुंधतिनमस्तुभ्यंमहा
पापप्रणाशिने ॥ पतिव्रतानांसर्वासांधर्मशीलप्रवर्तके ॥ अरुंधत्यैनमः ॥ अरुंधतींआ
वाहयामि ॥ ८ ॥ एवमावाह्य ॥ कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः ॥ जमद
ग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती ॥ श्रीअरुंधतीसहितकश्यपादिसप्तऋषिभ्योनमः ॥
ध्यानंसमर्पयामि ॥ १ ॥ पुष्पाक्षतसमायुक्तंनानारत्नैःसमन्वितम् ॥ आसनंकल्पि
तंभक्त्यागृण्हंतुमुनिसत्तमाः ॥ आसनंसमर्पयामि ॥ २ ॥ नानातीर्थसमानीतंसु
वर्णकलशेस्थितम् ॥ पुष्पाक्षतैर्युतंतोयंपाद्यार्थंप्रतिगृह्यताम् ॥ पाद्यंसमर्पयामि
॥ ३ ॥ सप्तर्षयः शुभाःश्रेष्ठाःसर्वेषांचशुभप्रदाः ॥ पूजिताभक्तियुक्तेनगृण्हंत्वर्घ्यंमया
हृतम् ॥ अर्घ्यंसमर्पयामि ॥ ४ ॥ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतम् ॥ तोय

माचमामनीयार्थंशीतलंप्रतिगुह्यताम् ॥ आचमनीयंसमर्पयामि ॥ ५ ॥ नानाती
र्थसमानीतंसुवर्णकलशैर्भृतम् ॥ सर्वैगृण्हंतुतत्तोयंस्नानार्थंहिसुवासितम् ॥ मलाप
कर्षस्नानंसमर्पयामि ॥ ६ ॥ ततःपंचामृतैःस्नपयिष्ये ॥ सुरभेस्तुसमुत्पन्नंदेवानाम
पिदुर्लभम् ॥ पयोददामिदेवेशस्नानार्थंप्रतिगृह्यताम् ॥ पयस्नानंसमर्पयामि ॥ १ ॥
चंद्रमंडलसंकाशंसर्वदेवप्रियंदधि ॥ भक्त्याददामिदेवेशस्नानार्थंप्रतिगृह्यताम् ॥ द
धिस्नानंसयर्पयामि ॥ २ ॥ आज्यंसुराणामाहारआज्यंयज्ञेप्रतिष्ठितम् ॥ आज्यंपवि
त्रंपरमंस्नानार्थंप्रतिगृह्यताम् ॥ घृतस्नानंसमर्पयामि ॥ ३ ॥ सर्वौषधिसमुत्पन्नंपीयू
षसदृशंमधु ॥ मधुमदामिदेवेशमधुस्नानायगृह्यताम् ॥ मधुस्नानंसमर्पयामि ॥ ४ ॥
इक्षुदंडात्समुत्पन्नाशर्करामधुराविभो ॥ देवदेवप्रियास्वादुस्नानार्थंप्रतिगृह्यताम् ॥
शर्करास्नानंसमर्पयामि ॥ ५ ॥ स्वच्छोदकैस्तुदेवेशस्वर्णकुंभसमाहृतम् ॥
गंधोदकैर्युतंभक्त्यातोयंस्नानायगृह्यताम् ॥ गंधोदकस्नानंसमर्पयामि ॥ ६ ॥
स्नानांतरंशुद्धोदकस्नानंसमर्पयामि ॥ पंचोपचारपूजा ॥ श्रीअरुंधतीसहितकश्य॥

पादिसप्तऋषिभ्योनमः ॥ विलेपनार्थेचंदनंसमर्पयामि ॥ श्रीअरुंधतीसहितक० ॥
अलंकारार्थेअक्षतान्समर्पयामि ॥ पूजार्थेपुष्पंसमर्पयामि धूपंसमर्पयामि ॥ दीपं
समर्पयामि ॥ नैवेद्यार्थेपंचामृतशेषनैवेद्यंसमर्पयामि ॥ हस्तप्रक्षालनंसमर्पयामि ॥
मुखप्रक्षालनंसमर्पयामि ॥ करोद्वर्तनार्थेचंदनंसमर्पयामि ॥ मुखवासार्थेपूगीफलतां
बूलंसमर्पयामि ॥ सुवर्णपुष्पदक्षिणांसमर्पयामि ॥ श्रीअरुंधतीसहितकश्यपादिसप्त
ऋषिभ्योनमः ॥ मंत्रपुष्पंसमर्पयामि ॥ श्रीअरुंधतीसहितकश्यपादिसप्तऋषिदेवता
भ्योनमः ॥ सर्वोपचारार्थेअक्षतान्समर्पयामि ॥ अनेनकृतपंचामृतपूजनेनअरुंधती
सहितकश्यपादिसप्तऋषिदेवताःप्रीयंताम् ॥ उत्तरेनिर्माल्यंविस्रस्य ॥ ततः अभिषेकं
कुर्यात् महिम्नःपारंतेपरमविदुषोयद्यसदृशीस्तुतिर्ब्रह्मादीनामपितदवसन्नास्त्वयिगि
रः ॥ अथवा० ॥ सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथःस्त
थासंकर्षणोविभुः ॥ प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते ॥ आखंडलोग्निर्भगवान्
यमोवैनिर्ऋतिस्तथा ॥ वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ॥ ब्रह्मणासहिताःसर्वे

दिक्पालाःपांतुतेसदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जाव
पुःशांतिःकांतिःपुष्टिश्चमातरः ॥ एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः ॥ आदि
त्यश्चंद्रमाभौमोबुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चपूजिताः ॥
देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमुनयोगावोदेवमातरएवच ॥ देवपत्न्योद्रु
मानागादैत्याश्चाप्सरसांगणाः ॥ अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच ॥ औ
षधानिचरत्नानिकालस्यावयवाश्चये ॥ सरितःसागराःशैलास्तीर्थानिजलदानदाः॥
एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये ॥ अमृताभिषेकोस्तु ॥ शांतिःपुष्टिस्तुष्टिश्चास्तु
महाभिषेकस्नानंसमर्पयामि स्नानांतेआचमनीयंसमर्पयामि ॥ वृक्षत्वग्निसमायुक्तं
मेषस्याजिनमुत्तमम् ॥ गृण्हंतुवस्त्रमेतत्तुसर्वपापापनुत्तये ॥ वस्त्रंसमर्पयामि ॥ कार्पा
ससूत्रजनितमुपवीतंमुनीश्वराः ॥ उत्तीर्यकेणसंयुक्तंगृह्यतांमुनिपुंखवाः ॥ यज्ञोपवीतं
समर्पयामि॥मलयाचलसंभूतंकर्पूरादिसमायुतम्॥ हृदयानंदनंचारुचंदनंप्रतिगृह्यता
म्॥विलेपनार्थेचंदनंसमर्पयामि॥अक्षताश्चसुरश्रेष्ठाःकुंकुमोक्ताःसुशोभिताः ॥ पूजासं

रक्षणार्थायईश्वरप्रतिगृह्याम् ॥ अक्षतान्समर्पयामि ॥ हरिद्रारंजितादेव्याःसौभाग्य
सुखदायिनी ॥ अतस्त्वामर्पयिष्यामिहरिद्रांसर्वकामदाम् ॥ हरिद्रांसमर्पयामि ॥ कुं
कुमंकांचनंदिव्यंकामनाकामसंभवम् ॥ कुंकुमेनार्चितंदेविगृहाणपरमेश्वरी ॥ कुंकु
मंसमर्पयामि ॥ कज्जलंकामिकंरम्यंकामनाकामसंभवम् ॥ नेत्रयोर्भूषणार्थायक
ज्जलंप्रतिगृह्यताम् ॥ कज्जलंसमर्पयामि ॥ नानाभरणशोभाढ्यैर्नानाद्रव्यैःसुपूजि
तम् ॥ अर्पितंचमयादेविताडपत्रंप्रगृह्यताम् ॥ ताडपत्रंसमर्पयामि ॥ हारकंकणके
यूरमेखलाकुंडलानिच ॥ अनेकभूषणार्थायदेवित्वंप्रतिगृह्यताम् ॥ भूषणानिसमर्प
यामि ॥ मांगल्यतंतुमणिभिर्मुक्ताफलविराजितम् ॥ कंठस्यभूषणार्थायप्रीत्यर्थंप्रति
गृह्यताम् ॥ कंठसूत्राद्याभरणंसमर्पयामि ॥ माल्यादीनिसुगंधीनि० ॥ पूजार्थेपुष्पं
समर्पयामि ॥ ॥ अथांगपूजा ॥ ॥ कश्यपायनमः पादौपूजयामि ॥ अत्र
येनमः ॥ जानुनीपूजयामि भरद्वाजायनमः॥ कटिंपूजयामि ॥ विश्वामित्रायनमः॥
नाभिंपूजयामि ॥ गौतमायनमः ॥ हृदयं पूजयामि ॥ जमदग्नयेनमः ॥ कंठंपूज

यामि ॥ वसिष्ठायनमः ॥ मुखंपूजयामि ॥ अरुंधत्यैयनमः ॥ ललाटंपूजयामि ॥
वेदव्रतांगायनमः शिरःपूजयामि ॥ ॥ अथपत्रपूजा ॥ ॥ कश्यपायनमः ॥
मुनिपत्रंसमर्यामि ॥ अत्रयेनमः ॥ वटपत्रंसमर्पयामि ॥ भरद्वाजायनमः ॥ अश्व
त्थपत्रंसमर्पयामि ॥ विश्वामित्रायनमः ॥ अर्कपत्रंसमर्पयामि ॥ गौतमायनमः ॥
अपामार्गपत्रंसमर्पयामि ॥ जमदग्नयेनमः ॥ ताडपत्रंसमर्पयामि ॥ वसिष्ठायनमः ॥
केतकीपत्रंसमर्पयामि ॥ अरुंधत्यैनमः ॥ नानाविधपत्राणिसमर्पयामि ॥वनस्पति०
॥ धूपंसमर्पयामि ॥ साज्यंचवर्ति० ॥ दीपंसमर्पयामि ॥ आहृत्यपच्यनैवेद्यं नाना
शाकैस्तुसंयुतम् ॥ लेह्यपेयसमायुक्तंनैवेद्यंप्रतिगृह्यताम् ॥ नैवेद्यार्थेनानाशाकनैवेद्यं
समर्पयामि ॥ नैवेद्यमध्येपानीयंसयर्पयामि ॥ उत्तरापोशनंसमर्पयामि ॥ हस्तप्रक्षा
लनंसमर्पयामि ॥ मुखप्रक्षालनंसमर्पयामि ॥ करोद्वर्तनार्थेचंदनंसमर्पयामि ॥ पुगी
फलंमहद्दिव्यंनागवल्यादलैर्युतम् ॥ कर्पुरेलासमायुक्तंतांबूलंप्रतिगृह्यताम् ॥ मुखवा
सार्थेपुगीफलतांबूलंसमर्पयामि ॥ हिरण्यगर्भेतिदक्षिणांस०॥इदंफलमितिफलंसम०

॥ चक्षुर्दंसर्वलोकानांतिमिरस्यनिवारणम् ॥आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वर॥
उत्तरनीरांजनदीपं ० ॥ कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः ॥ जमदग्निर्वसिष्ठ
श्चसाध्वीचैवाप्यरुंधती ॥ मंत्रपुष्पांजलिंसम ० ॥ यानिकानितिप्रदक्षिणाम् ॥ शर
णागतदीनार्तपरित्राणपरायणः ॥ रक्षंतुऋषयःसर्वेमांपुराशरणागतम् ॥ नमस्कारा
न्समर्पयामि ॥ येषांप्रभावेनदिवौकसाश्चमहाप्रभावास्तपसाबसेन ॥ लोकत्रयारि
ष्ठविनाशकानांसप्तर्षिणांहिममास्तुल्यपुजा ॥ प्रार्थनांसमर्पयामि ॥ आवाहनंनजा
नामि० ॥ यस्यस्मृत्याच० ॥ पूजासंपूर्णफलावाप्त्यर्थंअर्घ्यप्रदानंकरिष्ये ॥ कश्य
पायनमः इदमर्घ्यंस० ॥ अत्रयेनमः इदमर्घ्यंस० ॥ भरद्वाजायनमः इदमर्घ्यंस० ॥
विश्वामित्रायनमः इदम० ॥ गौतमायनमः इदम० ॥ जमदग्नयेनमः इदम० ॥ वसि
ष्ठायनमः इदम० ॥ अरुंधत्यैनसः इदम० ॥ अनेनअर्घ्यप्रदानेनभगवान्श्रीअरुंध
तीसहितकश्यपादिसप्तऋषिदेवताः प्रीयंताम् ॥ मंत्रहीनंक्रिया० ॥ अपराधसह० ॥
अनेनषोडशोपचारपूजनेनकर्मणाकश्यपादिसप्तऋषिदेवताः प्रीयंताम् ॥ अद्यपूर्वो

चरितवर्तमानएवंगुणविशेषेणविशिष्टायांशुभपुण्यतिथौममआत्मनः पुराणोक्तफल प्राप्त्यर्थंअरुंधतीसहितकश्यपादिसप्तऋषिप्रीत्यर्थंब्राह्मणायनानाशाकवायनप्रदान दानंकरिष्ये ॥ तथाचब्राह्मणपूजनम् ॥ वायनदानमंत्रः ॥ स्वस्त्यस्तुदीर्घमायुःश्रेयः शांतिःपुष्टिस्तुष्टिश्चास्तु ॥ नानाशाकसमायुक्तंदक्षिणाफलसंयुतम् ॥ वाणकंद्विजव र्यायसहिरण्यंददाम्यहम् ॥ विप्रायवेद्रविदुषे० ॥ इदंनानाशाकवायनंसदक्षिणाकं सताबूलंअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ तेनश्रीअरुंधतीसहितकश्यपादिस प्तऋषिदेवताः प्रीयंताम् ॥

॥ इतिऋषिपंचमीपूजासमाप्ता ॥

श्रीगणेशायनमः ॥ अथ ऋषिपंचमी कथा प्रारंभः ॥ नैमिषारण्याचे ठाईं सूत शौनकादि ऋषींप्रत सांगताहेत कीं, कोणीएके समयीं धर्मराजा श्रीकृष्णाप्रत प्रश्न करितो कीं हे देवदेवेश कृष्णा आजपर्यंत मीं व्रतें बहुत श्रवण केलीं आहेत परंतु सांप्रत कालीं पातक नाश करणारें असें आणखीं एकादें व्रत मला सांगावें. ॥ १ ॥ असें धर्मराजाचें भाषण कृष्ण श्रवण करून, भगवान् ह्मणतात कीं, हे राजेंद्रा

युधिष्ठिर उवाच ॥ ॥ श्रुतानिदेवदेवेशव्रतानिसुबहूनिच ॥ सांप्रतंमेऽन्यदा चक्ष्वव्रतंपापप्रणाशनं ॥ १ ॥ श्रीकृष्ण उवाच ॥ अथान्यदपिराजेंद्रपंचमीऋषि संज्ञिता ॥ कथयिष्यामियांकृत्वानारीपापात्प्रमुच्यते ॥ २ ॥ युधिष्ठिरउवाच ॥ कीदृशीपंचमीकृष्णकथंचऋषिसंज्ञिता ॥ पातकान्मुच्यतेकस्मान्नारीयदुकुलो द्भव ॥ ३ ॥

आतां तुला मी ऋषिपंचमी संज्ञक दुसरें व्रत सांगतों तें व्रत केलें असतां, स्त्री पापापासून मुक्त होते. ॥ २ ॥ असें कृष्णाचें भाषण ऐकून धर्मराजा ह्मणतो कीं, हे यदुकुलोद्भव कृष्णा या व्रताला ऋषि पंचमी अशी संज्ञा कशानें जहाली व हें व्रत स्त्रीनें केलें असतां कोणत्या पातकापासून मुक्त होते ? तें सांग ॥ ३ ॥

कारण, अनेक प्रकारचीं पातकें आहेत, याकरितां हे केशवा ऋषिपंचमीचे व्रत केलें असतां कोणत्या पातकापासून स्त्री मुक्त होते ? ॥ ४ ॥ धर्मराजाचें असें भाषण ऐकून श्रीकृष्ण ह्मणतो हे धर्मराजा, जी स्त्री जाणून किंवा न जाणून रजस्वला होते, आणि गृहधंदा करून भांड्यांला दुष्ट स्पर्श करिते, ॥ ५ ॥ ती महत्पापाप्रत पावत्ये, याकरितां सर्वथा रजस्वला स्त्री प्रयत्नें करून वर्ज्य करावी याचें

पापानिचबहून्यत्रविद्यंतेकिलकेशव ॥ कृतायामृषिपंचम्यांनारीकस्मात्प्रमुच्यते ॥ ४ ॥ श्रीकृष्णउवाच ॥ अज्ञानाज्ज्ञानतोवापिजातयास्त्रीरजस्वला ॥ दुष्टा स्पृशतिभांडानिगृहकर्मणिसंस्थिता ॥ ५ ॥ साप्राप्नोतिमहापापंसर्वानारीरजस्वला ॥ शृणुष्वकारणंयस्माद्वर्जनीयाप्रयत्नतः ॥ ६ ॥ प्रोत्सार्यागृहतश्चापि चातुर्वर्ण्येनभारत ॥ ब्रह्महत्यांपुराशक्रोवृत्रंहत्वाचप्राप्तवान् ॥ ७ ॥ तयावैराजशार्दूलपीडितोवृत्रसूदनः ॥ ब्रह्माणंसमुपागच्छदात्मनःशुद्धिकारणात् ॥ ८ ॥

कारण सांगतों श्रवण कर ॥ ६ ॥ चारी वर्णांनीं गृहापासून रजस्वला स्त्री दूर ठेवावी. पूर्वी इंद्रानें वृत्रासुराला मारून ब्रह्महत्येचें पातक केलें. ॥ ७ ॥ त्या ब्रह्महत्येच्या योगें करून हे राजश्रेष्ठा, इंद्र पीडित होत्साता त्या ब्रह्महत्येपासून आपली शुद्धी व्हावी याकरितां ब्रह्मदेवाप्रत जाता झाला ॥ ८ ॥

त्याकालीं ब्रह्मदेव प्रसन्न होऊन इंद्राला शुद्ध करावा या हेतूनें ब्रह्महत्येचे चार भाग करिता झाला ॥ ९ ॥ नंतर ते चार भाग चार ठिकाणी ठेविले एक अग्नीच्या प्रथम ज्वालेचे ठाईं, दुसरा नदीच्या प्रथमोदकीं ठेविला, ॥ १० ॥ तिसरा पर्वताचे ठाईं आणि चवथा स्त्रियांच्या रजाचे ठाईं. या करितां रजस्वला स्त्री प्रयत्नें करून दूर ठेवावी ॥ ११ ॥ असा दोष रजस्वलेचेठिकाणीं आहे, याकरितां चारी

शुद्धिंशक्रस्यराजेंद्रप्रहृष्टेनांतरात्मना ॥ विभज्यब्रह्महत्यांतुचतुर्धाचचतुर्मुखः ॥ ९ ॥ प्रापयद्राजशार्दूलचतुःस्थानेषुवैतदा ॥ वन्हेःप्रथमज्वालासुजातासुच नदीषुच ॥ १० ॥ पर्वतेषुचराजेंद्रनारीरजसिपार्थिव ॥ अतोरजस्वलानारीप्रोत्सार्यातुप्रयत्नतः ॥ ११ ॥ ब्रह्मणःशासनात्पार्थचातुर्वर्ण्येनसर्वदा ॥ प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी ॥ १२ ॥ तृतीयेरजकीप्रोक्ताचतुर्थेहनिशुद्ध्यति ॥ अज्ञानाज्ज्ञानतोवापिजातंसंसर्गपातकं ॥ १३ ॥

वर्णांनीं ब्रह्मदेवाच्या आज्ञेकरून दूर ठेवाव्या. प्रथम दिवशीं चांडाली सारिखी दुसरें दिवशीं ब्रह्महत्येसारिखा दोष आहे, ॥ १२ ॥ तिसरे दिवशीं रजकी प्रमाणें, चवथे दिवशीं स्नान करून शुद्ध होते. अज्ञानानें किंवा जाणून जें संसर्ग पातक होतें ॥ १३ ॥

50491

त्या पातकाच्या क्षयाकरितांच ऋषिपंचमीचें व्रत करावें ही पंचमी सर्व पातकाची व सर्व उपद्रवाची नाश करणारी आहे ॥ १४ ॥ याकरितां ब्राह्मण, क्षत्रिय, वैश्य, शूद्र या चारी वर्णांच्या स्त्रियांनीं विशेषेंकरून व्रत करावें. श्रीकृष्ण ह्मणतात धर्मराजा, या व्रताविषयीं दुसरें कथानक सांगतों ॥ १५ ॥ पूर्वीं कृतायुगाचेठाईं विदर्भ देशामध्यें चारी वर्णांचें पालन करणारा असा श्येनजित नामक राजा

तत्पापसंक्षयार्थंहिकार्येयमृषिपंचमी ॥ सर्वपापप्रशमनीसर्वोपद्रवनाशिनि ॥ १४ ॥ ब्रह्मक्षत्रियविट्शूद्रैस्त्रीभिःकार्याविशेषतः ॥ श्रीकृष्णउवाच ॥ अथान्यदपिराजेंद्रप्रवक्ष्यामिकथानकं ॥ १५ ॥ पुराकृतयुगेराजन्विदर्भायांबभूवह ॥ श्येनजिन्नामराजर्षिश्चातुर्वर्ण्यानुपालकः ॥ १६ ॥ तस्यदेशेवसद्विप्रोवेदवेदांगपारगः ॥ सुमित्रोनामराजेंद्रसर्वभूतहितेरतः ॥ १७ ॥ कृषिवृत्त्यासमासीनःकुटुंबपरिपालकः ॥ तस्यभार्यासुसाध्वीचपतिशुश्रूषणेरता ॥ १८ ॥

होता ॥ १६ ॥ त्याच्या देशांत वेदवेदांगामध्यें निष्णात सुमित्र नामक ब्राह्मण रहात होता आणि तो सर्व भूतांचें हित करणारा असा होता ॥ १७ ॥ त्यानें कृषिवृत्ती करून कुटुंबाचें पालन करावें; त्याची स्त्री महान् पतिव्रता आणि पतिसेवेविषईं तत्पर असे ॥ १८ ॥

जयश्री जिचें नाम, जिच्या घरीं सेवक व सुहृज्जन असतां स्वतः कृषिकर्माचे ठाईं रत असावें अशी असतां जिचें अंतःकरण व्याकुल होतें जहालें ॥ १९ ॥ त्याचें कारण कोणीएके दिवशीं ऋतु प्राप्त जहाला हें पाहून, राजा, तशीच ती गृहकर्म करिती जहाली ॥ २० ॥ हे राजन्, ती स्त्री ऋतु प्राप्त झाला असोन घरांत भांड्याला स्पर्श करिती जाहली. नंतर कांहीं दिवसांनीं मृत्यु प्राप्त जहाला

जयश्रीनामविख्याताबहुभृत्यसुहृज्जनाः ॥ क्षेत्रादिषुरतासाध्वीव्याकुलीभूत मानसा ॥ १९ ॥ एकदासात्मनःप्राप्तमृतुकालंव्यलोकयत् ॥ रजस्वलापिसा राजन्गृहकर्मचकारह ॥ २० ॥ भांडनिसास्पृशद्राजन्नृतौप्राप्तेपिभामिनी ॥ कालेनबहुनासाध्वीपंचत्वमगमत्तदा ॥ २१ ॥ तस्याभर्तापिविप्रोसौकालधर्म मुपेयिवान् ॥ एवंतौदंपतीराजन्स्वकर्मवशगौतदां ॥२२ ॥

॥ २१ ॥ तिचा पती सुमित्र ब्राह्मण तोही कांहीं कालें करून मरण पावला. अशीं तीं उभयतां स्त्री पुरुषें स्वकर्मवश होतीं जहालीं ॥ २२ ॥

नंतर ती ब्राम्हणाची स्त्री त्या संपर्कदोषेंकरून श्वान योनीप्रत पावली आणि हे राजा, तो सुमित्र ब्राह्मण ही तिच्या संपर्कदोषानें बैल होता जहाला. त्या दोषानें उभयतां ही दुर्गतीप्रत पावते जहाले ॥ २३ ॥ २४ ॥ परंतु त्या सुमित्राचा पुत्र सुमती पितृशुश्रुषेविषयीं रत आणि धर्मज्ञ असून देवता अतिथि यांचें पूजन करणारा असा होता ॥ २५ ॥ त्याचीं मातापितरें ऋतुसंपर्कदोषानें पशुयोनींमध्यें

भार्यातस्यजयश्रीःसासाक्षात्संपर्कदोषतः ॥ शुनीयोनिमनुप्राप्तासुमित्रोपिन रेश्वर ॥ २३ ॥ तस्याःसंपर्कदोषेणबलीवर्दोबभुवह ॥ तद्दोषेणमहाराजदुर्गतिं तौगतौतदा ॥ सुमित्रस्यचपुत्रोभूत्पितृशुश्रूषणेरतः ॥ सुमतिर्नामधर्मज्ञोदेवता तिथिपूजकः ॥ २५ ॥ तस्यतौपितरौपार्थऋतुसंपर्कदोषतः ॥ तिर्यग्योनिमनु प्राप्तावुभौजातिस्मरौनृप ॥ २६ ॥ सुतस्यैवगृहेराजन्स्मरंतौपूर्वपातकं ॥ अथ क्षयाहेसंप्राप्तेपितृशुश्रूषणेरतः ॥भार्यांचंद्रवतींप्राहसुमतिःश्रद्धयान्वितः ॥२७॥

पावलीं असून पूर्वजन्माचें स्मरण उभयतांसही होतें ॥ २६ ॥ हे राचन्, तीं दोघें ही आपल्या पुत्राचे घरींच जन्म घेऊन आपलें पूर्वपातक स्मरण करीत असत ॥ २७ ॥

नंतर कोणीएके दिवशीं पित्याची श्राद्धतिथि प्राप्त जाहली असतां पितृसेवेला तत्पर असा जो सुमति पुत्र तो श्रद्धेकरून आपली जी चंद्रवती भार्या तिजप्रत भाषण करिता जहाला ॥ २८ ॥ हे चारुहासिनी आज माझे पित्याचे सांवत्सरिक श्राद्ध आहे याकरितां ब्राह्मण भोजन केलें पाहिजे, यास्तव तूं पाकसिद्धी करावीस ॥ २९ ॥ नंतर चंद्रवतीनें भर्त्याचे आज्ञेवरून पाकसिद्धी केली असतां पायसाचे

॥ २८ ॥ अद्यसांवत्सरदिनंपितुर्मेचारुहासिनि॥भोजनीयामयाविप्राःपाकसिद्धिर्विधीयतां ॥२९॥ तयाकृतापाकसिद्धिःसुमतेर्भर्तुराज्ञया ॥ मुक्तंपायसभांडेस्याःसर्पेणगरलंततः ॥ ३० ॥ दृष्ट्वाब्रह्मवधाद्भीताशुनीभांडानिसास्पृशत्॥द्विजभार्याचतांदृष्ट्वाउल्मुकेनजघानह॥ ३१ ॥ भांडादीनिचप्रक्षाल्यत्यक्त्वापाकंसुमध्यमा ॥ पुनःपाकंचकृत्वातुश्राद्धंकृत्वाविधानतः ॥ ३२ ॥

भांड्यामध्यें सर्पानें गरल ह्मणजे विष टाकिलें ॥ ३० ॥ त कुत्रीनें पाहोन हें पायस ब्राह्मण भक्षण करतील तर मरण पावतील अशी भीती वाटून त्या भांड्याला स्पर्श केला तें चंद्रवतीनें पाहून क्रोधानें कोलितांनीं त्या कुत्रीला ताडण करिती जाहली ॥ ३१ ॥ नंतर चंद्रवतीनें तो पाक टाकून भांडीं क्षालन करून पुनः पाक करून यथाविधि श्राद्ध केलें ॥ ३१ ॥

ब्राह्मण भोजन जाहल्यानंतर उच्छिष्ट बाहेर त्या दिवशीं टाकिलें नाहीं भूमींत पुरून टाकिलें त्या योगानें कुत्रीला उपोषण होतें जाहलें ॥ ३३ ॥ नंतर रात्र झाल्यावर ती कुत्री अत्यंत क्षुधित होत्साति आपला भर्ता जो बलीवर्द त्याप्रत येऊन भाषण करिती जाहली ॥ ३४ ॥ हे भर्ता, मला आज भोजनादिक ग्रास मात्रसुद्धा कांहीं मिळालें नाहीं. तेणेंकरून क्षुधेची पीडा मला अत्यंत होत आहे ॥ ३५ ॥

ततोभुक्तेषुविप्रेषुनोच्छिष्टंतुददोबहिः ॥ भूमौक्षिप्तंतयाशून्याउपवासस्ततोऽभवत्॥३३॥ततोरात्र्यांप्रवृत्तायांसाशुनीक्षुधिताभृशं॥बलीवर्दमुपागत्यभर्तारमिदमब्रवीत्॥३४॥बुभुक्षिताद्यहेभर्तर्नदत्तंभोजनादिकं॥ग्रासादिकंचनप्राप्तंक्षुधामांबाधतेभृशं॥३५॥अन्यस्मिन्दिवसेपूत्रोममलेह्यंददात्यसौ॥अद्यमह्यंकिमप्येषउच्छिष्टमपिनोददौ॥३६॥पायसान्नेपपाताद्यगरलंसर्पसंभवं॥मयाविचिंत्यमनसामरिष्यंतिद्विजोत्तमाः॥ ३७ ॥

आमचा पूत्र अन्य दिवशीं मला खाणें पिणें देत असे, परंतु आज उच्छिष्ट सुद्धां दिलें नाहीं॥ ३६ ॥ याचें कारण कीं आज पायसान्नामध्यें सर्पाचें गरल पडलें तें मीं पाहिलें आणि मनांत विचार केला कीं या पायसभक्षणेंकरून ब्राह्मण मरतील ॥ ३७ ॥

मग मीं जाऊन त्या पायसाचे भांड्याला स्पर्श केला तेव्हां मला स्नुषेनें बंधन करून अत्यंत ताडन केलें तेणेंकरून माझें शरीर दुखत आहे आणि कंबर मोडून गेली, मीं काय करावें॥३८॥नंतर तिचें भाषण ऐकून तो बैल ह्मणतो कीं, हे भद्रे, तुझ्या पापसंग्रहेंकरून मीं बैल होऊन अशक्त जाहलों तथापि मला सोडीत नाहीं ॥ ३९ ॥ आज मीं प्रातःकालापासून पुत्राचे शेतांत फिरलों बुभुक्षितअसतां मुख

संस्पृष्टंपायसंगत्वावध्वाहंताडिताभृशं ॥ दुःखितंतेनमेमात्रंकटिर्भग्नाकरोमिकिं ॥ ३८ ॥ ततःप्राहसचानड्वाभद्रतेपापसंग्रहात् ॥ किंकरोमिह्यशक्तोऽहंभारवाहोह्यसंस्थितः ॥ ३९ ॥ अद्याहमात्मजक्षेत्रेवाहितःसकलंदिनं ॥ मारितश्चात्मजेनाहंमुखंबध्वाबुभुक्षितः ॥४०॥ वृथाश्राद्धंकृतंतेनजाताद्यममकष्टता ॥४१॥ श्रीकृष्णउवाच ॥ तयोःसंवदतोरेवंमातापित्रोश्चभारत ॥ श्रुत्वापुत्रस्तदावाक्यं यदुक्तंचतदोभयोः ४२ ॥

बांधोन पुत्रानें मला ताडन केलें ॥ ४० ॥ त्यानें आज श्राद्ध केलें तें वृथा जाहलें कारण मला कष्ट जाहले ॥ ४१ ॥ श्रीकृष्ण ह्मणतात, धर्मराजा, अशीं ती उभयतां बोलत होतीं. तें त्याचें भाषण सुमती पुत्र श्रवण करिता जाहला ॥ ४२ ॥

नंतर सुमती पुत्र रात्रीं तत्काल उठून हीं आपलीं माता पितरें आहेत असें जाणून भोजन देता जाहला ॥ ४३ ॥ आणि त्या कालीं त्यांची ती अवस्था पाहून दुःखित होत्साता वनाप्रत जाता जाहला ॥ ४४ ॥ कारण मातापितरांचे कष्ट पाहून यांतून मुक्त करावें या इच्छेनें अरण्यांत फिरतां फिरतां तेथें ज्ञानवृद्ध परम धार्मिक असे ऋषी पाहोन त्यांला नमस्कार करून मातापितरांची मुक्ती व्हावी अशा

ततोरजन्यांतत्कालंददौतस्यैवभोजनं ॥ पितरौतौविदित्वातुदत्तवान्सुमतिस्तदा ॥ ४३ ॥ ततोसौदुःखितःपुत्रोज्ञात्वावस्थांतदातयोः ॥ मातापित्रोस्तुराजेंद्रतदासौप्रस्थितोवनं ॥ ४४ ॥ ज्ञातुमिच्छामिकष्टंवैमातापित्रोश्चभारत ॥ इत्रगत्वाज्ञानवृद्धान्ऋषीन्परमधार्मिकान् ॥ प्रणिपत्याब्रवीद्वाक्यंहितंचैवतदातयोः ॥ ४५ ॥ सुमतिरुवाच ॥ कथयध्वंविप्रवर्याःप्रश्नमेतंसमाहिताः ॥ केनकर्मविपाकेनपितरौमेतपोधनाः ॥इमामवस्थांसप्राप्तौमुच्येतेपातकात्कथं॥४६॥

हेतूनें भाषण करिता जाहला ॥ ४५ ॥ सुमती म्हणतो, हे ऋषिश्रेष्ठहो, माझा हा प्रश्न श्रवण करून स्वस्थ चित्तानें कथन करा. हे तपोधनहो, माझीं मातापितरें कोणच्या कर्मविपाकें करून या योनीला प्राप्त जाहलीं, आणि या पातकापासून कशीं मुक्त होतील ॥ ४६ ॥

सुमतीचें असें भाषण ऐकून ऋषी ह्मणतात, हे ब्राह्मण, पूर्वजन्मीं तुझी माता ऋतु प्राप्त जाहला असून अज्ञानपणानें गृहामध्यें संपर्क करिती जाहली ॥ ४७ ॥ त्या कर्माच्या योगानें शुनि योनिप्रत प्राप्त झाली आणि तुझा पिताही तीच्या स्पर्शदोषेंकरूनबलीवर्द होता जाहला ॥ ४८ ॥ यास्तव तूं यांच्या मुक्तीकरितां भार्येसहवर्तमान सप्तऋषींचें पूजनात्मक व्रत आचरण करावेंस ॥ ४९ ॥ असें

ऋषयऊचुः ॥ तवमातापुराविप्रस्वगृहेबालभावातः ॥ ऋतुंप्राप्तंविदित्वातुसंपर्क मकरोद्द्विज ॥ ४७ ॥ तेनकर्मविपाकेनशुनीयोनिमुपागता ॥ पितापिस्पर्श दोषेणबलीवर्दोबभूवह ॥ ४८ ॥ एतयोर्मुक्तिकामार्थंकुरुत्वमृषिपंचमीं ॥ भार्य यासहविप्रेंद्रऋषीन्संपूज्यत्नतः ॥ ४९ ॥ आचरस्वव्रतंतत्रसप्तवर्षंद्विजोत्तम ॥ अंतेचोद्यापनंकुर्याद्वित्तशाठ्यविवर्जितः ॥ ५० ॥ शाकाहारस्तुकर्तव्यःश्यामा काहारएववा ॥ नीवारैर्वापिकर्तव्यःकृष्टपच्यंनभक्षयेत् ॥ ५१ ॥

सात वर्षें व्रत आचरण करून शेवटीं वित्तशाठ्यता न करितां उद्यापन करावेंस ॥ ५० ॥ त्या दिवशीं शाका आहार करावा किंवा सांवे खावे अथवा तृणधान्य भक्षण करावें, परंतु नागरलेल्या शेतांतलें धान्य कांहीं भक्षण करूं नये ॥ ५१ ॥

तें व्रत कसें करावें तें सांगतोंः- भाद्रपद शुक्ल पंचमीचे दिवशीं माध्यान्ह कालीं स्वच्छ उदक असेल अशा नदीवर जाऊन ॥ ५२ ॥ आघेड्याच्या समिधा घेऊन दंतधावन करावें प्रथम आयुर्बलं० हा मंत्र ह्मणून आघाड्याची प्रार्थना करावी; आयु बल यश तेज प्रजा पशु द्रव्य हीं दे ॥ ५३ ॥ आणि ब्रह्मज्ञान धारणाबुद्धि हीं तूं दे या मंत्रानें प्रार्थना करून दंतधावन करावें ॥ ५४ ॥ मुख दुर्गंधि

प्राप्यभाद्रपदेमासेशुक्लपक्षस्यपंचमीं ॥ तस्यांमध्यान्हसमयेनद्यादौविमलेजले ॥ ५२ ॥ कृत्वापामार्गसमिधादंतधावनमादितः ॥ आयुर्बलंयशोवर्चःप्रजाः पशुवसूनिच ॥ ५३ ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते ॥ संप्रार्थ्यानेनमंत्रेणकुर्याद्वैदंतधावनं ॥ ५४ ॥ मुखदुर्गंधिनाशायस्नात्वामृत्स्नानपूर्वकं ॥ तिलामलककल्केनकेशान्संशोध्ययत्नतः ॥ ५५ ॥ परिधायनवेशुद्धेवाससीसुसमाहितः ॥ पुजयत्वमृषींन्दिव्यानरुंधत्यासमन्वितान् ॥ ५६ ॥

नाशार्थ दंतधावन करून मृत्तिका स्नानपुर्वक स्नान करावें, आणि तिळ आंवळे वांटुन केशांस लावून धुवोन स्नान करावें ॥ ५५ ॥ नंतर नवें शुभ्र वस्त्र परिधान करावें आणि स्वस्थ अंतःकरणानें अरुंधती सहवर्तमान सप्तऋषींचें पूजन करावें ॥ ५६ ॥

ती पूजा कश्यपोत्रिभरद्वाजो यामंत्रानें करावी ॥ ५७ ॥ यामंत्रानें स्वस्थ चित्त करून हे ब्राह्मणा, ऋषींचें पूजन केलें असतां ऋतुसंपर्क स्त्रियांचे दोष नाश होतात ॥ ५८ ॥ ५९ ॥ कृष्ण ह्मणतात, हे धर्मराजा, असें तो सुमती ब्राम्हण ऋषींचे भाषण श्रवण करून नंतर आपल्या घरीं येऊन भक्तीनें

कश्यपोत्रिभरद्वाजोविश्वामित्रोथगौतमः जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती ॥ ५७ ॥ मंत्रेणानेनसप्तर्षीन्पूजयेत्सुसमाहितः ॥ व्रतेनऋषिपंचम्याःकृतेनैवंद्विजोत्तम ॥ ५८ ॥ ऋतुसंपर्कजादोषाःक्षयंयांतिनसंशयः ॥ ५९ ॥ श्रीकृष्णउवाच ॥ तच्छ्रुत्वासुमतिर्वाक्यंपरमंऋषिभाषितं ॥ गृहमेत्यव्रतंचक्रेसभार्यःश्रद्धयान्वितः ॥ ६० ॥ व्रतंतुऋषिपंचम्या·सर्वपापप्रणाशनं ॥ कृत्वासर्वंयथोक्तंचमातापित्रोःफलंददौ ॥ ६१ ॥

स्त्रीसहवर्तमान व्रत करिता झाला ॥ ६० ॥ असें हें ऋषिपंचमीचें व्रत सर्व पाप नाश करणारें तो सुमति यथोक्त विधीनें करून त्या व्रताचें फल मातापितरांस देता जहाला ॥ ६१ ॥

नंतर त्या व्रतपुण्यप्रभावेंकरून त्याची माता श्वयोनीपासून मुक्त होऊन उत्तम विमानांत बसून ॥ ६२॥ दिव्यवस्त्र परिधान करून स्वर्गाप्रत जाती जाहली. नंतर त्याचा पिता सुमित्रही मरण पावोन पशु योनींतून मुक्त होता जहाला ॥ ६३ ॥ आणि हे राजा, या व्रताच्या प्रभावें करून स्वर्गाप्रत प्राप्त जहाला आणि कायिक वाचिक मानसिक पातक नाश होतें ॥ ६४ ॥ अशीं या व्रताच्या योगानें

व्रतपुण्यप्रभावेनमातातस्यश्वयोनितः ॥मुक्तानृपतिशार्दूलविमानवरमास्थिता ॥ ६२ ॥ दिव्यांबरधराभूत्वागतास्वर्गंचभारत ॥ पितापिसमृतोगछत्सुमित्रः पशुयोनितः ॥ ६३ ॥ स्वर्गंप्राप्तोमहाराजव्रतस्यास्यप्रभावतः ॥ कायिकंवाचिकंवापिमानसंयच्चदुष्कृतं ॥ ६४ ॥ तत्सर्वंविलयंयातिव्रतस्यास्यप्रभावतः ॥ यस्ययज्जायेतपुण्यंतच्छृणुष्वनृपोत्तम ॥ ६५ ॥ सर्वव्रतेषुयत्फलं ॥ सर्वदानेषुदत्तेषुतदेतद्व्रतचारणात् ॥ ६६ ॥

पातकें नाश होऊन ज्याला जें पुण्य प्राप्त होतें तें सांगतों, राजा श्रवण कर ॥ ६५ ॥ सर्व व्रतामध्यें जें पुण्य आणि सर्व तीर्थ स्नान करून जें पुण्य आणि सर्व दानें करू जें फल तें या व्रताच्या आचरणमात्रेंकरून फल प्राप्त होतें ॥ ६६ ॥

असें हें व्रत जी स्त्री करित्ये ती सर्व सुख भोगणारी होत्ये. आणि रूप लावण्यानें युक्त होत्साती पुत्रपौत्रादिकांनीं युक्त होत्ये. ॥ ६७ ॥ आणि या लोकीं सुख भोगून परलोकीं उत्तम गतीप्रत पावत्ये ॥ ६८ ॥ कृष्ण ह्मणतात; हे राजा, व्रतामध्यें उत्तम व्रत तुला सांगितलें हें व्रत सर्व संपत्ती देणारें आणि स्त्रियांचें पातक नाश करणारें आहे ॥ ६९ ॥ आणि कसें आहे ? धनदायक, कीर्ति करणारें,

कुरुतेयाव्रतंनारीसाभवेत्सुखभोगिनी ॥ रूपलावण्ययुक्ताचपुत्रपौत्रादिसंयुता ॥ ६७ ॥ इहलोकेसुखंहिस्यात्परत्रचपरांगतिं ॥ एतत्तेकथितंराजन्व्रतानामुत्तमंव्रतं ॥ सर्वसंपत्प्रदंचैवनारीणांपापनाशनं ॥ ६८ ॥ धनंयशश्चस्वर्गंचपुत्रानपियुधिष्ठिर ॥ पठतांशृण्वतांचापिसर्वपापप्रणाशनं ॥ ६९ ॥ इतिश्रीभविष्योत्तरपुराणेऋषिपंचमीव्रतकथासमाप्ता ॥ श्रीकृ० ॥

स्वर्ग प्राप्ती करणारें व पुत्रप्रद आहे व या व्रताची जे कथा श्रवण किंवा पठण करितात त्यांचेंही सर्व पातक नाश होतें या प्रकारें करून कृष्ण धर्मराजाला सांगते जहाले आणि सूत शौनकादिऋषींप्रत कथन करिते जहाले तीच कथा भगवच्चरणारविंदीं निरूपण असो ॥ ७० ॥ इति भविष्योत्तरपुराणे ऋषिपंचमीव्रतकथा सार्था संपूर्णा ॥ श्रीकृष्णार्पणमस्तु ॥ शुभं भवतु ॥

हें पुस्तक
पुरंदरे आणि कंपनी यांणीं
" ज्यूबिली " प्रिंटिंग प्रेस मध्यें छापून प्रसिद्ध केलें.
शके १८१८, सन १८९६. तारिख २० माहे जूलै.
(सर्व हक्क प्रसिद्ध कर्त्यांनीं ठेविला आहे)

॥ इति ऋषिपंचमीपूजासार्थकथा समाप्तः ॥

S. N. D. T. WOMEN'S UNIVERSITY LIBRARY

AUTHOR

TITLE

DATE DUE

BORROWER'S NAME

modar Thacke
SITY LIBR
AY

Year 1971

ouncil
Scien

V Sa 294.5
Ris
50491

Date Due